# Shri Chidambareshvara Shrinataraja Devalayastha Devata Stotram

# શ્રીચિદમ્બરેશ્વર શ્રીનટરાજ દેવાલયસ્થ દેવતાસ્તોત્રમ્

## Document Information

Text title : Shri Chidambareshvara Shrinataraja Devalayastha Devata Stotram

File name : chidambareshvarashrInaTarAjadevAlayasthadevatAstotraM.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીચિદમ્બરેશ્વર શ્રીનટરાજ દેવાલયસ્થ દેવતાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીચિત્સભેશાય નમઃ ।
૧. શ્રીગોપુરાણિ
(દક્ષિણગોપુરદ્વારે અન્નમયપ્રાકારે)
નમામિ ગોપુરાણીશ તવ મૂર્ત્યન્તરાણ્યહમ્ ।
તાન્યદ્ય પરયા ભક્ત્યા મુક્તયે નટનાયક ॥ ૧॥

૨. શ્રીનન્દિકેશઃ
નન્દિકેશ મહાભાગ શિવધ્યાનપરાયણ ।
નટેશ્વરસ્ય સેવાર્થં અનુજ્ઞાં દેહિ મે પ્રભો ॥ ૨॥

૩. શ્રીજયઃ (ગોપુરપશ્ચિમે)
જયાય જયરૂપાય ગોપુરદ્વારવર્તિને ।
જયદાય નટેશાનરક્ષકાય નમોઽસ્તુતે ॥ ૩॥

૪. શ્રીવિજયઃ (ગોપુરપૂર્વે)
વિજયાય નમસ્તુભ્યં ભક્તેભ્યો જયદાયિને ।
મહેશાનદ્વારરક્ષાં કુર્વતે ભયહારિણે ॥ ૪॥

૫. શ્રીગણેશઃ શ્રીગુરુમૂર્તિશ્ચ (પ્રાણમયપ્રાકારે)
દક્ષિણાભિમુખં દેવં ગણેશં ગુરુમેવ ચ ।
વિઘ્નાનાં ચ વિનાશાય વિદ્યાલાભાય ચ સ્તુમઃ ॥ ૫॥

૬. શ્રીકાર્તિકેયઃ
ઉત્તરાભિમુખં સ્કન્દં કાર્તિકેયં મહાપ્રભુમ્ ।
વન્દે વાઞ્છિતલાભાય સ્ત્રીણાં સ્તન્યપ્રવર્ધકમ્ ॥ ૬॥

૭. શ્રીમૂષિકેન્દ્રઃ
મૂષિકેન્દ્ર નમસ્તુભ્યં ગણેશધ્યાનતત્પર ।

ગણેશસ્ય તુ સેવાર્થં અનુજ્ઞાં દાતુમર્હસિ ॥ ૭॥

૮. શ્રીત્રિશિવવિનાયકઃ (મુક્કુરુણિવિનાયકઃ)
ત્રિશિવાખ્યં ચ વરદં ગજવક્ત્રં સલડ્ડુકમ્ ।
દન્તપાશાઙ્કુશધરં વન્દેઽહં ગણનાયકમ્ ॥ ૮॥

૯. શ્રીવિજયસુબ્રહ્મણ્યઃ (પશ્ચિમગોપુરદક્ષિણભાગે)
મયૂરપિઞ્છાવલિમેઘપઙ્ક્તેઃ મધ્યે સહસ્રાંશુમિવોદયન્તમ્ ।
રિપૌ ચ પાણૌ ચ સદા દધન્તં દણ્ડં ભજે ષણ્મુખમાશુતુષ્ટિદમ્ ॥ ૯॥

૧૦. શ્રીકલ્પકવિનાયકઃ
યસ્ય સ્મરણમાત્રેણ સર્વાઃ સિદ્ધ્યન્તિ સિદ્ધયઃ ।
તં ગણેશમહં વન્દે કલ્પકાખ્યમહર્નિશમ્ ॥ ૧૦॥

૧૧. શ્રીબિલ્વવૃક્ષઃ
મૂલતો બ્રહ્મરૂપાય મધ્યતો વિષ્ણુરૂપિણે ।
અગ્રતઃ શિવરૂપાય બિલ્વવૃક્ષાય તે નમઃ ॥ ૧૧॥

૧૨. શ્રીનાગરાજઃ
નાગરાજ નમસ્તુભ્યં દેવેશ હરભૂષણ ।
વિષ્ણુતલ્પ નમસ્તેઽસ્તુ સર્પભીતિં નિવારય ॥ ૧૨॥

૧૩. શ્રીવીરસુબ્રહ્મણ્યઃ
વલ્લીસેનાયુતં મુત્તુકુમારસ્વામિનં પ્રભુમ્ ।
તારકઘ્નં મહાવીરસુબ્રહ્મણ્યમુપાસ્મહે ॥ ૧૩॥

૧૪. શ્રીસુન્દરેશ્વરઃ
સુન્દરં મથુરાનાથં મીનાક્ષીવલ્લભં શિવમ્ ।
ચિદમ્બરકૃતાવાસં સુન્દરેશમહં ભજે ॥ ૧૪॥

૧૫. શ્રીમીનાક્ષી
જગદમ્બ કદમ્બમૂલવાસે કમલામોદમુખેન્દુમન્દહાસે ।
મદમન્દિરચારુદૃગ્વિલાસે મયિ મીનાક્ષિ કૃપાં વિધેહિ દાસે ॥ ૧૫॥

૧૬. શ્રી આદિવિનાયકઃ
શિવગઙ્ગાપશ્ચિમસ્થદેશે સ્તમ્ભૈકસંયુતે ।
મણ્ડપે સંસ્થિતં આદિવિનાયકમુપાસ્મહે ॥ ૧૬॥

૧૭. શ્રીચિત્રગુપ્તઃ

ચિત્રગુપ્તં મહાપ્રાજ્ઞં સાક્ષિણં સર્વદેહિનામ્ ।
નમામિ ધર્માધર્મજ્ઞં લેખિનીપત્રધારિણમ્ ॥ ૧૭॥

૧૮. શ્રીચક્રં
શ્રીચક્રં શિવશક્ત્યૈક્યબોધકં યન્ત્રમુત્તમમ્ ।
સર્વકામપ્રદં સર્વદેવેડ્યં સમુપાસ્મહે ॥ ૧૮॥

૧૯. શ્રીનન્દિકેશઃ
નન્દિકેશ મહાભાગ શિવાધ્યાનપરાયણ ।
મહેશ્વર્યા સુસેવાર્થં અનુજ્ઞાં દાતુમર્હસિ ॥ ૧૯॥

૨૦. શિવકામસુન્દરી
શ્રીમચ્ચિત્પુરવાસિનીં ભયહરાં જ્ઞાનપ્રદાં નિર્મલાં
શ્રીમદ્બ્રહ્મનુતાં ચરાચરમયીં સર્વાર્થસિદ્ધિપ્રદામ્ ।
શ્રીમત્ષણ્મુખ વિઘ્નરાજજનનીં શ્રીમજ્જગન્મોહિનીં
કલ્હારં જપસૃચ્છુકાં કરિકરાં દેવીં સદા ભાવયે ॥ ૨૦॥

૨૧. સપ્ત માતરઃ
બ્રાહ્મીં માહેશ્વરીં ચૈવ કૌમારીં વૈષ્ણવીં તથા ।
વારાહીં નારસિંહીં ચ ચામુણ્ડાં પ્રણમામ્યહમ્ ॥ ૨૧॥

૨૨. શ્રીચણ્ડિકેશી
શિવકામીપદામ્ભોજ પરિસ્ફુરિતમાનસે ।
દેવ્યાસ્સેવાફલં દેહિ ચણ્ડિકેશિ નમોઽસ્તુતે ॥ ૨૨॥

૨૩. શ્રીપૃથ્વીદેવી
ઇક્ષુશાલિયવસસ્યફલાઢ્યાં પારિજાતતરુશોભિતમૂલે ।
સ્વર્ણરત્નમણિમણ્ડપમધ્યે ચિન્તયે સકલલોકધરિત્રીમ્ ॥ ૨૩॥

૨૪. શ્રીદુર્ગા
શરણમસિ સુરાણાં સિદ્ધવિદ્યાધરાણાં
મુનિમનુજપશૂનાં દસ્યુભિસ્ત્રાસિતાનામ્ ।
નૃપતિગૃહગતાનાં વ્યાધિભિઃ પીડિતાનાં
ત્વમસિ શરણમેકા દેવિ દુર્ગે નમસ્તે ॥ ૨૪॥

૨૫. શ્રીમયૂરેશઃ
મયૂરેશ નમસ્તુભ્યં ષણ્મુખધ્યાનતત્પર ।

ષણ્મુખસ્ય સુસેવાર્થમનુજ્ઞાં દાતુમર્હસિ ॥ ૨૫॥

૨૬. શ્રી પાણ્ડ્યનાયકષણ્મુખસુબ્રહ્મણ્યઃ

ષડ્વક્ત્રં શિખિવાહનં ત્રિણયનં ચિત્રામ્બરાલઙ્કૃતં
    વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં-ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશઞ્ચ વરદં દોર્ભિર્દધાનં સદા
    વન્દે સિદ્ધિદમીશ્વરં શિવસુતં સ્કન્દં સુરારાધિતમ્ ॥ ૨૬॥

૨૭. શ્રીવલ્લી

સ્કન્દસ્ય દક્ષિણેભાગે સ્થિતાં પઙ્કજધારિણીમ્ ।
દક્ષે લમ્બકરાં શ્યામાં વલ્લીદેવીં નમામ્યહમ્ ॥ ૨૭॥

૨૮. શ્રીદેવસેના

ગુહસ્ય વામભાગસ્થાં પીતામુત્પલધારિણીમ્ ।
વામે લમ્બકરાં દેવસેનાં નૌમિ મહેન્દ્રજામ્ ॥ ૨૮॥

૨૯. શ્રીજયમુરુકઃ વ૨્ । (શ્રીજયમુરુગઃ)

જયાનન્દભૂમન્ જયાપારધામન્ જયામોઘકીર્તે જયાનન્દમૂર્તે ।
જયાનન્દસિન્ધો જયાશેષબન્ધો જય ત્વં સદા મુક્તિદાનેશસૂનો ॥

૩૦. શ્રીયમધર્મરાજઃ

નીલપર્વતસઙ્કાશં રુદ્રકોપસમુદ્ભવમ્ ।
કાલં દણ્ડધરં દેવં વૈવસ્વતમુપાસ્મહે ॥ ૩૦॥

૩૧. શ્રીકાલહસ્તીશ્વરઃ

દત્ત્વા સ્વમાંસનયને શબરોઽપિ યસ્મૈ
    દૂરીચકાર મહતીમપિ કાલભીતિમ્ ।
વન્દે સમસ્તસુલભાર્ચિતપાદપદ્મં
    તં કાલહસ્તીશમપારદયામ્બુરાશિમ્ ॥ ૩૧॥

૩૨. શ્રીજ્ઞાનપ્રસૂનામ્બિકા

શ્રીકાલહસ્તીશ્વરધર્મપત્નીં જ્ઞાનપ્રસૂનેતિ પ્રસિદ્ધનામ્નીમ્ ।
જ્ઞાનપ્રદાત્રીં પરમામ્બિકાં તાં જ્ઞાનેષ્ટસિદ્ધ્યૈ પ્રણમામિ નિત્યમ્ ॥ ૩૨॥

૩૩. નવ લિઙ્ગાનિ

મધ્યસ્થં ભાસ્કરેશં ચ પશ્ચાદઙ્ગારકપ્રભુમ્ ।
શુક્રેશં સોમનાથં ચ બુધેશં ચ ગુરુપ્રભુમ્ ॥ ૩૩॥

શનીશં રાહુનાથં ચ કેત્વીશં ચ સદા નુમઃ ।
એતેષાં પૂજનેનૈવ પ્રસીદેયુઃ નવ ગ્રહાઃ ॥ ૩૪॥

૩૪. શ્રીશિવગઙ્ગા
વિષ્ણોસ્સઙ્ગતિકારિણી શિવજટાજૂટાટવીચારિણી
પ્રાયશ્ચિત્તનિવારિણી જલકણૈઃ પુણ્યૌઘવિસ્તારિણી ।
ભૂભૃત્કન્દરદારિણી નિજજલે મજ્જજ્જનોત્તારિણી
શ્રીમચ્ચિત્ખપુરે સ્થિતા વિજયતે ગઙ્ગા શિવેત્યન્વિતા ॥ ૩૫॥

૩૫. શ્રીજમ્બુકેશ્વરઃ
શ્રુત્યન્તવેદ્ય મહસે કિટિહંસરૂપ
ગોવિન્દપદ્મભવમૃગ્યપદાબ્જમૂર્ધન્ ।
ભૂયોઽખિલાણ્ડરમણી સતતાર્ચિતાય
શ્રીજમ્બુમૂલનિલયાય નમોભવાય ॥ ૩૬॥

૩૬. શ્રીતીર્થાલોકન ગણપતિઃ
સ જયતિ સિન્ધુરવદનો દેવો યત્પાદપઙ્કજસ્મરણમ્ ।
વાસરમણિરિવ તમસાં રાશિં નાશયતિ વિઘ્નાનામ્ ॥ ૩૭॥

૩૭. શ્રીકૈલાસનાથઃ
કૈલાસનાથં વિશ્વેશં પાર્વતી પ્રાણવલ્લભમ્ ।
કૃપાલું જગદાધારં વન્દે સમ્પત્સમૃદ્ધિદમ્ ॥ ૩૮॥

૩૮. શ્રીસોમનાથઃ
વેદોપગીતં ભુવનેશ્વરં ચ તેજસ્વિનં સર્વમનોઽભિરામમ્ ।
શ્રીસોમનાથં ભુજગેન્દ્રહારં નમામિ નિત્યં ભવરોગવૈદ્યમ્ ॥ ૩૯॥

૩૯. શ્રીગઙ્ગાધરઃ
ગઙ્ગાધરં દશભુજં સર્વાભરણભૂષિતમ્ ।
નીલગ્રીવં શશાઙ્કાઙ્કં નાગભૂષણમાશ્રયે ॥ ૪૦॥

૪૦.શ્રીકલાધરઃ
કલાધરં મહાદેવં કાલકાલં કલાપ્રિયમ્ ।
શિવં શિવકરં નૃણાં શિવાજાનિમુપાસ્મહે ॥ ૪૧॥

૪૧. શ્રીપુરુષમૃગઃ
ધ્યાનૈકનિષ્ઠં પુરુષમૃગં ભક્તવરં પરમ્ ।

શિવસેવાફલપ્રાપ્ત્યૈ નમામિ શિવસન્નિધૌ ॥ ૪૨॥

૪૨. શ્રીઆમ્રફલવિનાયકઃ
વિનાયકં ચામ્રફલહસ્તં વિઘ્નવિનાશકમ્ ।
ભક્તેભ્યઃ ફલદાતારં નમામિ દ્વિરદાનનમ્ ॥ ૪૩॥

૪૩. અન્નપૂર્ણા
અન્નપૂર્ણે વિશાલાક્ષિ વિશ્વનાથમનોહરિ ।
ચિદમ્બરકૃતાવાસે સમ્પૂર્ણાન્નં પ્રયચ્છ મે ॥ ૪૪॥

૪૪. શ્રી સોમાસ્કન્દમૂર્તિઃ
સોમાસ્કન્દં સુરપતિં સુન્દરં સોમશેખરમ્ ।
સોમસૂર્યાગ્નિનેત્રાણિ દધતં પ્રણમામ્યહમ્ ॥ ૪૫॥

૪૫. શ્રીશરભેશ્વરઃ
યોઽભૂત્સહસ્રાંશુ શતપ્રકાશઃ નૃસિંહસઙ્ક્ષોભસમાત્તરૂપઃ ।
સપક્ષિસિંહાકૃતિરષ્ટપાદઃ પાયાદપાયાત્ શરભેશ્વરો નઃ ॥ ૪૬॥

૪૬. શ્રીઊર્ધ્વતાણ્ડવમૂર્તિઃ
વાણીવલ્લભ વન્દ્ય વૈભવયુતં વન્દારુચિન્તામણિં
    વાતાશાધિપભૂષણં વરકૃપાવારાન્નિધિં શ્રીકરમ્ ।
ઊર્ધ્વાનન્દવિશેષતાણ્ડવકરં શ્રીનૃત્તરાજેશ્વરં
    વામાઙ્ગાપ્તવરાઙ્ગનં શિવમહં શ્રીમન્નટેશં ભજે ॥ ૪૭॥

૪૭. શ્રીકાલસંહારમૂર્તિઃ
મૃત્યુઞ્જય મહારુદ્ર પાહિ માં શરણાગતમ્ ।
જન્મમૃત્યુજરારોગૈઃ પીડિતં કર્મબન્ધનૈઃ ॥ ૪૮॥

૪૮. શ્રીમહાલક્ષ્મીઃ
ભૂયાદ્ભૂયો દ્વિપદ્માભયવરદકરા તપ્તકાર્તસ્વરાભા
    શુભ્રાભ્રાભેભયુગ્મદ્વયકરધૃતકુમ્ભાદ્ભિરાસિચ્યમાના ।
રત્નૌઘાબદ્ધમૌલિઃ વિમલતરદુકૂલાર્તવાલેપનાઢ્યા
    પદ્માક્ષી પદ્મનાભોરસિ કૃતવસતિઃ પદ્મગા શ્રીઃ શ્રિયૈ નઃ ॥ ૪૯॥

૪૯. શ્રીદણ્ડાયુધપાણિઃ
દણ્ડાયુધધરં દેવં મુરુકં બાલરૂપિણમ્ ।
સુબ્રહ્મણ્યં સુરેશાનં સર્વાભીષ્ટપ્રદં ભજે ॥ ૫૦॥

૫૦. શ્રીઆકાશવિનાયકઃ (દ્રવિડવેદપ્રદર્શકઃ)
આકાશસ્થં દ્રાવિડશ્રીવેદસન્દર્શકં પ્રભુમ્ ।
મહાગણપતિં ચોલભૂપવન્દિતમાશ્રયે ॥ ૫૧॥

૫૧. શ્રીમાયૂરનાથઃ
મયૂરરૂપધારિણ્યા પાર્વત્યા પૂજિતં શિવમ્ ।
મયૂરનાથમીશાનં પ્રણમામિ મહેશ્વરમ્ ॥ ૫૨॥

૫૨. શ્રીમયૂરેશઃ
શક્તિહસ્તં વિરૂપાક્ષં મણિકુણ્ડલધારિણમ્ ।
શ્યામલાતનયં સ્કન્દં મયૂરેશં નમામ્યહમ્ ॥ ૫૩॥

૫૩. શ્રીમયૂરગણપતિઃ
ગણેશં પાર્વતીસૂનું મયૂરપદપૂર્વકમ્ ।
મલત્રયાપહન્તારં ચન્દ્રચૂડામણિં ભજે ॥ ૫૪॥

૫૪. દ્રાવિડવેદપ્રવર્તકાઃ શિવભક્તાગ્રેસરાઃ ચત્વારઃ
વાગીશ જ્ઞાનસમ્બન્ધમણિવાચકસુન્દરાન્ ।
દ્રાવિડશ્રીવેદગાન ગાયકાન્ સંશ્રયે મુદા ॥ ૫૫॥

૫૫. શ્રીદક્ષિણામૂર્તિઃ
સ્ફટિકરજતવર્ણં મૌક્તિકીમક્ષમાલાં
અનલકલશવિદ્યાં જ્ઞાનમુદ્રાઃ કરાબ્જૈઃ ।
દધતમુરગકક્ષં ચન્દ્રચૂડં ત્રિણેત્રં
વટતરુસુખવાસં દક્ષિણામૂર્તિમીડે ॥ ૫૬॥

૫૬. શ્રીપલ્લીશઃ
પલ્લીશાય નમસ્તુભ્યં પરમેશાય તે નમઃ ।
પલ્લીપતનજં દોષ નિવારય સુખં કુરુ ॥ ૫૭॥

૫૭. વલ્લભાગણપતિઃ
વન્દે મહાગણપતિં મદનારિસૂનું
વામોરુસુસ્થવનિતાભુજવેષ્ટિતાઙ્ગં
વલ્લીશપૂર્વજમભીષ્ટદમાશ્રિતાનાં
વાણીપતિપ્રમુખદેવગણાર્ચિતાઙ્ઘ્રિમ્ ॥ ૫૮॥

૫૮. શ્રીજગન્મોહનગણપતિઃ

ગિરિજાહસ્તલિખિત ચિત્રભિત્તિવિભૂષણમ્ ।
જગતાં મોહકં દેવં વન્દે ગણપતિં સદા ॥ ૫૯॥

૫૯. શ્રીનન્દિકેશ્વરઃ
નન્દિકેશ મહાભાગ શિવધ્યાનપરાયણ ।
ઉમાશઙ્કરસેવાર્થમનુજ્ઞાં દાતુમર્હસિ ॥ ૬૦॥

૬૦. શ્રીમૂલનાથઃ
જટાતટી જહ્નુકુમારિકાયાઃ તાટઙ્કિતા યસ્ય તરઙ્ગસઙ્ઘૈઃ ।
તસ્મૈ મહિમ્નામવસાનસીમ્ને શ્રીમૂલનાથાય નમશ્શિવાય ॥ ૬૧॥

૬૧. શ્રીઉમા પાર્વતી
નમામિ મેનાતનયામમેયાં ઉમામ્બિકામાનતનન્દદાત્રીમ્ ।
વિશાલનેત્રાં પ્રણમામિ ગૌરીં ચતુર્ભુજાં દક્ષિણમૂલનાથામ્ ॥ ૬૨॥

૬૨. શ્રીવિશ્વનાથઃ
વાચામગોચરમનેકગુણસ્વરૂપં
ગૌરીનિરન્તરવિભૂષિતવામભાગમ્ ।
વાગીશ વિષ્ણુસુરસેવિતપાદપીઠં
વન્દે ચિદમ્બરપતિં શિવવિશ્વનાથમ્ ॥

૬૩. શ્રીએકામ્રેશ્વરઃ
કામાક્ષ્યા કવિતાદાત્ર્યા કાઞ્ચ્યામામ્રતરોરધઃ ।
પૂજિતં ચિત્પુરે વન્દે એકામ્રેશ્વરમુત્તમમ્ ॥ ૬૪॥

૬૪. શ્રીકલ્પકવૃક્ષઃ
કલ્પવૃક્ષ નમસ્તુભ્યં દેવવૃક્ષ નમોઽસ્તુ તે ।
ત્વદીયમૂલનિકટે વાઞ્છિતં સુલભં ભવેત્ ॥ ૬૫॥

૬૫. શ્રીવૈદ્યનાથઃ
અનવધિદયાપીયૂષામ્ભોધિસારમયં
    નિજસ્મરણસમયાલીઢાશેષામયગ્રહપીડનમ્ ।
નિટિલનયનજ્યોતિઃ સ્વાહાકૃતાસમસાયકં
    જયતુ મહિતં તેજઃ શ્રીવૈદ્યનાથસમાહ્વયમ્ ॥ ૬૬॥

૬૬. શ્રી દૈવનાયકી
નમામિ ભવસન્તાપનિર્વાપણસુધાનદીમ્ ।

શ્રી દૈવનાયકીં દેવીં કાન્તાં ચન્દ્રાર્ધશેખરામ્ ॥ ૬૭॥

૬૭. શ્રી વિનાયકઃ

મહાગણપતિં વન્દે મહાવિઘ્નનિવારણમ્ ।
મહાદેવસુતં દેવં મહાશૈલસુતાસુતમ્ ॥ ૬૮॥

૬૮. શ્રીત્રિસહસ્રમુનીશ્વરઃ

નટરાજસમં દેવં ત્રિસહસ્રમુનીશ્વરમ્ ।
નટેશપૂજકં વન્દે તિલ્લારણ્યનિવાસિનમ્ ॥ ૬૯॥

૬૯. શ્રીઅર્ધનારીશ્વરઃ

યદર્ધાઙ્ગં નારી વિલસતિ પરાકાન્તિરુચિરા
    પરાઙ્ગં પુંરૂપં જયતિ ચ જટાજૂટરુચિરમ્ ।
સદા શૃઙ્ગારિત્વં વહતિ વપુષૈવં ત્રિભુવને
    નમસ્તસ્મૈ કસ્મૈચિદખિલવિવર્તાય મહસે ॥ ૭૦॥

૭૦. શ્રીસુન્દરવિનાયકઃ

વામાઙ્કારૂઢ વામોરુવક્ષોજાનીતપુષ્કરમ્ ।
વિઘ્નવારણહર્યક્ષં વિઘ્નરાજમુપાસ્મહે ॥ ૭૧॥

૭૧. શ્રીમહાલિઙ્ગં

મહાલિઙ્ગં મહાભાગં મહેશ્વરમુમાપતિમ્ ।
મહાસેનગુરું વન્દે મહાભયનિવારણમ્ ॥ ૭૨॥

૭૨. શ્રીબૃહત્સુન્દરકુચામ્બા

મહાલિઙ્ગસ્ય મહિષીં મહનીયાં દયાનિધિમ્ ।
શ્રી બૃહત્સુન્દરકુચામમ્બાં વન્દેઽખિલેષ્ટદામ્ ॥ ૭૩॥

૭૩. શ્રીચણ્ડિકેશઃ

મૂલનાથ-પદામ્ભોજ પરિસ્ફુરિતમાનસ ।
શમ્ભોસ્સેવાફલં દેહિ ચણ્ડિકેશ નમોઽસ્તુતે ॥ ૭૪॥

૭૪. શ્રીઅરુણાચલેશ્વરઃ

આધારાચલ કૈતવાદતિચિરં પિણ્ડીકૃતં પાવકં
    રક્ષન્દગ્ધુમિવાખિલં પ્રતિમુહુઃ કલ્પાન્તકાલે જગત્ ।
પાયાન્નઃ કરુણામૃતોર્મિસરલૈરાલોકનૈરાનતાન્
    એણાઙ્કાર્ધશિખાયુતઃ સ ભગવાન્ શોણાચલાધીશ્વરઃ ॥ ૭૫॥

૭૫. શ્રીશાસ્તા

હરેઃ શ્રીમોહિનીરૂપધારિણઃ શ્રીશિવસ્ય ચ ।
જાતં શાસ્તારમીશાનં વન્દે શક્તિદ્વયાન્વિતમ્ ॥ ૭૬।

૭૬. શ્રીદેવસભાસ્થદેવાઃ

દેવતાનાં સભા યત્ર રાજતે તત્ર સંસ્થિતાન્ ।
દેવાન્ દેવીંશ્ચ ભક્તાંશ્ચ પ્રણમામિ વરપ્રદાન્ ॥ ૭૭॥

૭૭. શ્રીકઞ્ચુકનાથઃ (શટ્ટનાથઃ)

દેવો ભૈરવનામવાન્ શુનિ મહાદેવાજ્ઞયા યઃ સ્થિતઃ
    વૃદ્ધં વામનમેત્ય વક્ષસિ જઘાનૈકેન તં પાણિના ।
ઉત્કૃત્ય ત્વચમસ્ય કઞ્ચુકતયા ચાત્માનમસ્મિન્ દધૌ
    તં વન્દે સુખદં ચિદમ્બરપુરે શ્રીશટ્ટનાથાહ્વયમ્ ॥ ૭૮॥

૭૮. શ્રીનવગ્રહાઃ

સૂર્યાય લોકગુરવે ધરણીસુતાય
    શુક્રાય શીતરુચયે વિધુનન્દનાય ।
ઇન્દ્રાદિદેવગુરવે શનિરાહવે ચ
    કેતુગ્રહાય શુભદાય નમાંસિ નિત્યમ્ ॥ ૭૯॥

૭૯. શ્રીશઙ્ખધ્મવિનાયકઃ

કલ્પાન્તકાલે શિશુરૂપધારી
    શઙ્ખં સમાદાય મહાસ્વનેન ।
દધ્મૌ હિ યઃ કાઞ્ચનસદ્મનાથં
    શઙ્ખધ્મવિઘ્નેશ્વરમાદ્યમીડે ॥ ૮૦॥

૮૦. શ્રીઅર્ધયામસુન્દરઃ

સુન્દરં શિવરક્ષાયાં તત્પરં શિવકિઙ્કરમ્ ।
નમામિ શિવસેવાયાઃ ફલલાભાય ભાસ્વરમ્ ॥ ૮૧॥

૮૧. શ્રીગરુડઃ

વૈનતેયં ચ પક્ષીન્દ્રં વિષ્ણુવાહં મહોત્તમમ્ ।
સર્પારિં ગરુડં વન્દે સર્પભીતિનિવારકમ્ ॥ ૮૨॥

૮૨. શ્રીશઙ્કરનારાયણૌ

વન્દે શઙ્ખકપાલ ભૂષિતકરૌ માલાસ્થિમાલાધરૌ
    દેવૌ દ્વારવતીશ્મશાનનિલયૌ નાગારિગોવાહનૌ ।

દ્વિત્ર્યક્ષૌ બલિદક્ષયજ્ઞમથનૌ શ્રીશૈલજાવલ્લભૌ
પાપં મે હરતાં સદા હરિહરૌ શ્રીવત્સ ગઙ્ગાધરૌ ॥ ૮૩॥

નારાયણં હૃદિ વિભાવ્ય તદીયહાર્દા-
કાશે શિવં ગિરિજયા સહિતં નટેશમ્ ।
સઞ્ચિન્તયેત્સતતમેવમુપાસનેન
સિદ્ધિં લભેત નિયતાં નિરુપાધિકાં તામ્ ॥ ૮૪॥

૮૩. શ્રીગોવિન્દરાજસન્નિધૌ હિરણ્યનરસિંહઃ

સ્તમ્ભેઽસ્મિન્નપિ સત્યમસ્તિ સ હરિઃ તર્હીહ હન્યામમું
વિષ્ણું વઞ્ચિતદાનવં મમ રિપું ધૂર્તં મહામાયિનમ્ ।
ઇત્યાક્રુશ્ય રુષા હિરણ્યકશિપું સ્તમ્ભં વિભેત્તું પદા
ઘ્નન્તં યસ્તરસા જઘાન ભગવાન્ તં શ્રીનૃસિંહં ભજે ॥ ૮૫॥

૮૪. શ્રીસુદર્શનં

સુદર્શનં મહાવેગં ગોવિન્દસ્ય પ્રિયાયુધમ્ ।
જ્વલત્પાવકસઙ્કાશં શ્રીચક્રં પ્રણમામ્યહમ્ ॥ ૮૬॥

૮૫. શ્રીપાઞ્ચજન્યં

ક્ષીરસાગરસઞ્જાતં વિષ્ણુના વિધૃતં કરે ।
પૂજિતં સર્વદેવૈશ્ચ પાઞ્ચજન્યં નમામ્યહમ્ ॥ ૮૭॥

૮૬. શ્રીવેણુગોપાલઃ

રુક્મિણીસત્યભામાભ્યાં સંયુતં દેવકીસુતમ્ ।
ગીતોપદેશકં વેણુગોપાલં નૌમિ સુન્દરમ્ ॥ ૮૮॥

૮૭. શ્રીપતઞ્જલિઃ

અનસૂયાસુતં દેવમાદિશેષં પતઞ્જલિમ્ ।
અત્રેસ્સૂનું મહાભાષ્યરચિતારમહં ભજે ॥ ૮૯॥

૮૮. શ્રીકણ્વઃ

કણ્વં મહર્ષિપ્રવરં કાણ્વશાખાપ્રવર્તકમ્ ।
શકુન્તલાપોષકં તં જ્ઞાનિનં પ્રણમામ્યહમ્ ॥ ૯૦॥

૮૮. શ્રીગરુડારૂઢઃ

દક્ષહસ્તે ચક્રધરં વામહસ્તે ચ શઙ્ખકમ્ ।
દધતં ગરુડારૂઢમૂર્તિં વિષ્ણું ભજેઽન્વહમ્ ॥ ૯૧॥

૯૦. શ્રીયોગનરસિંહઃ
પ્રહ્લાદાહ્લાદકં યોગનરસિંહં નતાર્થદમ્ ।
શઙ્કરાચાર્ય સુખદમુત્તરાભિમુખં ભજે ॥ ૯૨॥

૯૧. શ્રીરામપાદદ્વયં
રામચન્દ્રપદામ્ભોજદ્વયં સંસારતારકમ્ ।
અહલ્યારૂપદાતારં પરમં પ્રણમામ્યહમ્ ॥ ૯૩॥

૯૨. શ્રીવિષ્વક્સેનઃ
યસ્ય દ્વિરદવક્ત્રાદ્યાઃ પારિષદ્યાઃ પરશ્શતમ્ ।
વિઘ્નં નિઘ્નન્તિ સતતં વિષ્વક્સેનમુપાસ્મહે ॥ ૯૪॥

૯૩. શ્રીઆઞ્જનેયઃ
આઞ્જનેયં મહાપ્રાજ્ઞં રુદ્રસ્યાંશં મહાબલમ્ ।
કપિવર્યં મારુતિં ચ હનુમન્તં નમામ્યહમ્ ॥ ૯૫॥

૯૪. ॥ શ્રીગોવિન્દરાજઃ ॥

શ્રીમાન્ક્ષીરાર્ણવાન્તઃ ફણિપતિશયને ચન્દ્રખણ્ડાતિગૌરે
ભૂમાનીલાસમેતઃ સકલ ભુવનસંરક્ષણોપાયચિન્તામ્ ।
નિદ્રાવ્યાજેન કુર્વન્ નિરવધિમહિમા નિત્યમુક્તાભિવન્દ્યઃ
શેતે ગોવિન્દરાજઃ પ્રદિશતુ સુતરાં સન્તતં મઙ્ગલં નઃ ॥ ૯૬॥

૯૫. (શઠારિઃ) શ્રી રામપાદુકા
રામપાદસહધર્મચારિણીં પાદુકાં નિખિલપાતકચ્છિદમ્ ।
તામશેષજગતામધીશ્વરીં ભાવયામિ ભરતાદિદેવતામ્ ॥ ૯૭॥

૯૬. શ્રીનૃત્તવિનાયકઃ
માતામહમહાશૈલં મહસ્તદપિતામહમ્ ।
પિણ્ડીકૃતમહાવિઘ્નં નૃત્તવિઘ્નેશ્વરં ભજે ॥ ૯૮॥

૯૭. શ્રીલિઙ્ગોદ્ભવઃ
પાર્શ્વયોઃ બ્રહ્મવિષ્ણુભ્યાં સ્રીરૂપાભ્યાં શિવાજ્ઞયા ।
સંસેવિતં મહેશાનં લિઙ્ગોદ્ભવમહં ભજે ॥ ૯૯॥

૯૮. શ્રીષડાનનમૂર્તિઃ
વન્દે સિન્દૂરકાન્તિં શરવિપિન ભવં શ્રીમયૂરાધિરૂઢં
ષડ્વક્ત્રં દેવસેનામધુરિપુતનયાવલ્લભં દ્વાદશાક્ષમ્ ।

શક્તિં બાણં કૃપાણં ધ્વજમપિ ગદાં ચાભયં દક્ષહસ્તૈઃ
 ચાપં વજ્રં સરોજં કટકમપિ વરં શૂલમન્યૈર્દધાનમ્ ॥ ૧૦૦॥

૯૯. શ્રીશયનાગારે શિવભોગસુન્દરી
શિવભોગસુન્દરિ નમસ્તે ત્રિણયનવામાઙ્કવાસિનિ નમસ્તે ।
શિવકામસુન્દરિ નમો નતજનકૈવલ્યદાયિનિ નમસ્તે ॥ ૧૦૧॥

૧૦૦. શ્રીઆકાશલિઙ્ગં
પ્રપન્નજનસન્દોહ સર્વકલ્યાણદાયકમ્ ।
આકાશલિઙ્ગં વન્દેઽહં આધિવ્યાધિપ્રણાશકમ્ ॥ ૧૦૨॥

૧૦૧. શ્રીજૈમિનિઃ
વ્યાસશિષ્યં જૈમિનિં ચ કર્મકાણ્ડપ્રવર્તકમ્ ।
ચિદમ્બરનટેશાનદર્શને તત્પરં મુનિમ્ ॥ ૧૦૩॥

૧૦૨. શ્રી ભિક્ષાટનઃ
બ્રહ્માણ્ડસ્થિત ભૂતજાતહૃદયપ્રોધન્તિ કામાન્યહો
 યઃ પૂર્વં સહસા પ્રપૂરયતિ બહુપ્રીત્યા ભવાનીપતિઃ ।
સોઽયં સર્વવસુન્ધરાપતિરપિ સ્ત્રીભ્યશ્ચ ભિક્ષાટનઃ
 સઞ્જાતઃ કૃપયેતિ વૈભવયુતં દેવં નમામો વયમ્ ॥ ૧૦૪॥

૧૦૩. ક્ષેત્રપાલઃ
નીલરુચિવેદકરવહ્નિનયનં તં શૂલકકપાલડમરું ચ સહપાશમ્ ।
નગ્નશુન વાહનસકિઙ્કિણિ વિભૂષં પ્રોચ્ચગતિકેશધર સર્પવરહારમ્ ॥

૧૦૪. વ્યાઘ્રપાદઃ
માધ્યન્દિન સુતં શાન્તં વસિષ્ઠભગિનીપતિમ્ ।
ઉપમન્યોશ્ચ પિતરં વ્યાઘ્રપાદં નમામ્યહમ્ ॥ ૧૦૬॥

૧૦૫. શ્રીદણ્ડી
નટેશ દક્ષિણે પાર્શ્વે સ્થિતં ભક્તવરં શુભમ્ ।
શિવસેવાં પ્રકુર્વન્તં દણ્ડિનં પ્રણમામ્યહમ્ ॥ ૧૦૭॥

૧૦૬. શ્રીપતઞ્જલિઃ
યોગેન ચિત્તસ્ય પદેન વાચાં મલં શરીરસ્ય ચ વૈદ્યકેન ।
યોઽપાકરોત્તં પ્રવરં મુનીનાં પતઞ્જલિં પ્રાઞ્જલિરાનતોઽસ્મિ ॥ ૧૦૮॥

૧૦૭. શ્રીમુણ્ડી

નટેશવામપાર્શ્વે તુ સંસ્થિતં મુનિપુઙ્ગવમ્ ।
પતઞ્જલિસમેતં ચ મુણ્ડિનં પ્રણમામ્યહમ્ ॥ ૧૦૯॥

૧૦૮. શ્રીનન્દિકેશ્વરઃ
નન્દિકેશં મહાભાગં શિવધ્યાનપરાયણમ્ ।
અષ્ટમૂર્તેરધિષ્ઠાનં નમામિ સુયશાપતિમ્ ॥ ૧૧૦॥

૧૦૯. શ્રીચિત્સભા
વામાદ્યા નવશક્તયો યદુપરિ શ્રીસ્વર્ણકુમ્ભા નવૈ-
તસ્યાં ચિન્મયસંસદિ પ્રતનુતે નૃત્તં નટેશઃ સદા ।
તદ્વામે નગજા રહસ્યમપિ તદ્દક્ષેઽસ્તિ ચૈદમ્બરં
શ્રીવ્યાઘ્રાઙ્ઘ્રિપતઞ્જલી મુનિવરૌ તત્પાર્શ્વયોઃ સંસ્થિતૌ ॥

સભાં નવાભાં નટરાજરાજપ્રસિદ્ધનાટ્યાગમદિવ્યરઙ્ગમ્ ।
આનન્દનૃત્તસ્ય વિતાનભૂતાં શ્રીચિત્સભાં નિત્યમહં નમામિ ॥

૧૧૦. શ્રીનટરાજરાજઃ
વેદાન્તોદ્ગીતરૂપં જ્વલનડમરુકં ધારયન્તં કરાભ્યાં
અન્યાભ્યાં ડોલમુદ્રામભયમપિ સદાઽપસ્મૃતૌ દક્ષપાદમ્ ।
વિન્યસ્યાકુઞ્ચિતેન પ્રણમદખિલદં વામપાદેન નિત્યં
દેવ્યા સાકં સભાયાં રચયતિ નટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥

૧૧૧. શ્રી શિવકામસુન્દરી
શ્રી શિવકામસુન્દરીં તામખિલજગન્માતરં કૃપાર્દ્રહૃદમ્ ।
શ્રીચિત્સભેશમહિષીં ચિદમ્બરક્ષેત્રવાસિનીં વન્દે ॥ ૧૧૪॥

૧૧૨. શ્રીરહસ્યં
શ્રી ચક્રાદિવિશેષયન્ત્રઘટિતં ભિત્તિસ્વરૂપં સદા-
　　નન્દજ્ઞાનમયં નટેશશિવયોઃ સમ્મેલનં બોધયત્ ।
શ્રીજામ્બૂનદબિલ્વપત્રરચિતૈઃ માલાગણૈઃ લક્ષિતં
　　કસ્તૂરીમસૃણં ચિદમ્બરમિદં સ્થાનં રહસ્યં નુમઃ ॥ ૧૧૫॥

લોકાતિશાયિવિભવં મહદાસેવે ચિદમ્બરરહસ્યમ્ ।
પઞ્ચાક્ષરી યદીયા જીવાતુઃ સર્વલોકશુભદાત્રી ॥ ૧૧૬॥

શક્તીઃ સમગ્રાઃ ગ્રસતે દિનાન્તે યસ્મિંશ્ચ ગૌર્યા વલતે કપર્દીમ્ ।
યસ્માત્પ્રગે વિશ્વમુપૈતિ શક્તિં ચકાસ્તિ તચ્ચેતસિ મે ચકાસ્તુ ॥

૧૧૩. શ્રીચન્દ્રમૌલીશ્વરઃ
ચન્દ્રમૌલીશ્વરં લિઙ્ગં ચન્દ્રામૃતઘનં સિતમ્ ।
સૂર્યેન્દ્વગ્નિરુચિં સૂક્ષ્મ ગોમુખે સ્થાપિતં ભજે ॥ ૧૧૮॥

૧૧૪. શ્રીરત્નસભાપતિઃ
ઇન્દ્રનીલસમાનકાન્તિસમેધિતાત્મતનુપ્રભં
ઇન્દ્રનીલમણિપ્રકાણ્ડમયાત્મદેહવિભાકરમ્ ।
ઇન્દ્રમુખ્યદિવૌકસાદિસમર્ચિતં શ્રુતિમાર્ગિતં
ઇન્દ્રનીલમહાર્ઘરત્નસભાપતિં શિવમાશ્રયે ॥ ૧૧૯॥

૧૧૫. શ્રીમુખલિઙ્ગં
અભૂતપૂર્વં પ્રથતે જગત્યાં યલ્લિઙ્ગમાસાદિતદિવ્યવક્ત્રમ્ ।
તતઃ પ્રસિદ્ધં મુખલિઙ્ગનામ્ના તલ્લિઙ્ગમીશસ્ય સદા સ્મરામિ ।
૧૧૬. શ્રીશિવપાદુકા
સકલમનુજરક્ષાદીક્ષિતં વેદરીત્યા
ત્રિષવણમતિભક્ત્યા દીક્ષિતૈરર્ચ્યમાનમ્ ।
હરિવિધિસનકાદ્યૈઃ નિત્યનિધ્યાયમાનં
શયનગૃહયિયાસું પાદયુગ્મં પ્રપદ્યે ॥ ૧૨૧॥

૧૧૭. શ્રીઅસ્ત્રરાજઃ
વિનાઽસ્ત્રરાજં ન શિવસ્ય યાત્રા વિનાઽસ્ત્રરાજં ન ચ મજ્જનાદિ ।
વિનાઽસ્ત્રરાજં ન મહો ભવસ્ય તમસ્ત્રરાજં પ્રણમામિ મૂર્ધ્ના ॥ ૧૨૨॥

૧૧૮. શ્રી સ્વર્ણકાલભૈરવઃ
દક્ષે ડમરુકં શૂલં વામે પાશં કપાલકમ્ ।
હસ્તે ધરન્તં ચ શુના સહિતં સુમનોહરમ્ ॥ ૧૨૩॥

સ્વપાદન્યસ્તતામ્રં ચ સ્વર્ણં કૃત્વા દદૌ પુરા ।
ભક્તેભ્ય ઇતિ તં સ્વર્ણકાલભૈરવમાશ્રયે ॥ ૧૨૪॥

સ્વર્ણકાલભૈરવં ત્રિશૂલયુક્તપાણિનં
વેદરૂપસારમેયસંયુતં મહેશ્વરમ્ ।
સમાશ્રિતેષુ સર્વદા સમસ્તવસ્તુદાયિનં
મખીન્દ્રવંશપૂર્વપુણ્યરૂપિણં સમાશ્રયે ॥ ૧૨૫॥

૧૧૯. શ્રીબલીશ્વરઃ
શ્રીબલીશ્વરમીશાનં ફલદાતારમવ્યયમ્ ।

ઉમયા સહિતં ચન્દ્રશેખરં સમુપાસ્મહે ॥ ૧૨૬॥

૧૨૦. શ્રીબ્રહ્મા
પઞ્ચાનનો યઃ પુરતઃ પ્રકૃત્યા પરં નિકૃત્તસ્વશિરાઃશિવેન ।
સ્વનિઃશ્રુતીનાં વદનાનિ યસ્ય બ્રહ્માણમમ્ભોજભવં નમામિ ॥ ૧૨૭॥

૧૨૧. શ્રીચણ્ડિકેશઃ
ચણ્ડીશ્વરસ્સ્થાણુસમાનતેજા રુદ્રેણ નિક્ષિપ્તસમસ્તભારઃ ।
યસ્ય પ્રસાદાત્સફલા શિવાર્ચા તં ચણ્ડિકેશં પ્રણમામિ ચાન્તે ॥ ૧૨૮॥

૧૨૨. શ્રી ચિન્તામણિવિનાયકઃ
તં મન્મહે મહેશાનં મહેશાનપ્રિયાર્ભકમ્ ।
ચિન્તામણિગણેશાનં ગજાનનમનામયમ્ ॥ ૧૨૯॥

૧૨૩. શ્રી વલ્લીશઃ
એકાનનં ચન્દનલેપિતાઙ્ગં મહાદ્ભુતં દિવ્યમયૂરવાહનમ્ ।
રુદ્રસ્ય સૂનું સુરનાથપુત્રીપતિં ચ વલ્લીશમુપાસ્મહેઽનિશમ્ ॥ ૧૩૦॥

૧૨૪. શ્રી ત્યાગરાજઃ
ત્યાગરાજં મહેશાનં કમલાલયવાસિનમ્ ।
નમામિ પરયા ભક્ત્યા મુચુકુન્દવરપ્રદમ્ ॥ ૧૩૧॥

મહાબલિમુખાસ્સર્વે શિવાજ્ઞાપરિપાલકાઃ ।
મયા નિવર્તિતાસ્સન્તો ગચ્છન્તુ શિવસન્નિધિમ્ ॥ ૧૩૨॥

યશ્શિવો નામરૂપાભ્યાં યા દેવી સર્વમઙ્ગલા ।
તયોસ્સંસ્મરણાન્નિત્યં સર્વતો જયમઙ્ગલમ્ ॥ ૧૩૩॥

ઇતિ શ્રીચિદમ્બરેશ્વર શ્રીનટરાજ દેવાલયસ્થ દેવતાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Chidambareshvara Shrinataraja Devalayastha Devata Stotram*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*